# कनकाम्बरि

## रागम्: कनकाम्बरि     ताळम्: रूपकम्

### श्री मुत्तुस्वामि दीक्षित विरचिता

पल्लवि

कनकाम्बरि कारुण्यामृतलहरि
कामाक्षि मामव कामेश्वरि

अनुपल्लवि

दिनकरचन्द्र तेजःप्रकाशकरि
देवि महात्रिपुरसुन्दरि शङ्करि

चरणम्

त्रैलोक्यमोहनादिचक्रेश्वरि

त्रैपदपरब्रह्ममहिषि भास्वरि

सालोक्यादिमुक्तिप्रदानकरि
सदाशिवकरि गुरुगुहोदयकरि

मध्यमकाल साहित्यम्

मूलादिनवाधारेश्वरि शुभकरि

नीलालकधरि नित्यानन्दकरि

लीलाविश्वोत्पत्तिस्थितिलयकरि
बाला परमेश्वरि पञ्चदशाक्षरि

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇